# स्त्रीप्रत्ययप्रकरणम् – अभ्यासः

# उत्तराणि

स्त्रीप्रत्ययान्तं रूपं चित्वा ससूत्रं साधयत ।

१. नारीणाम् उत्तमा वधूः ।

नारी – नर+ङीन् / नृ+ङीन् [‘शार्ङ्गरवाद्यञो ङीन्’-४.१.७३, ‘नृनरयोर्वृद्धिश्च’ (ग ५४) इति गणसूत्रेण वृद्धिश्च]

उत्तमा – उत्तम+टाप् [‘अजाद्यतष्टाप्’- ४.१.४]

वधूः- स्त्रीप्रत्ययान्तं न। [ ‘वहो धश्च’ इति वहधातोः औणादिकः ऊप्रत्ययः, धातुहकारस्य धकारश्च। ]

२. सुमुखी नलिनी सुभ्रूः ।

सुमुखी (शोभनं मुखं यस्याः) – सुमुख+ङीष् [‘स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्’- ४.१.५४]

नलिनी- नलिन+ङीष् [‘जातेरस्त्रीविषयादयोपधात्’- ४.१.६३]/ नलिन्+ङीप् [‘ऋन्नेभ्यो ङीप्’ – ४.१.५] (नलानां पद्मानां समूहः नली, नलान्यत्र सन्तीति नली)

सुभ्रूः - (शोभना भ्रूः यस्याः) – स्त्रीप्रत्ययान्तं न ।[‘भ्रमेश्च डूः’ इत्यौणादिकडूप्रत्ययान्तः]

३. अष्टाध्यायी जगन्माता ।

अष्टाध्यायी (अष्टानाम् अध्यायानां समाहारः) – अष्टाध्याय+ङीप् [‘द्विगोश्च’ – ४.१.२१]

जगन्माता (जगतः माता) – मातृशब्दात् ‘ऋन्नेभ्यो ङीप्’ (४.१.५) इति ङीपि प्राप्ते ‘न षट्स्वस्रादिभ्यः’ (४.१.१०) इति तन्निषेधः ।

४. वैयाकरणसिद्धान्तकौमुदीयं विरच्यते ।

वैयाकरणसिद्धान्तकौमुदी (वैयाकरणसिद्धान्तानां कौमुदी - कुमुदस्येयम् इत्यर्थे 'तस्येदम्' – ४.३.१२० इति अण्-प्रत्ययान्तः) –कौमुद+ङीप् [ 'टिड्ढाणञ्...' – ४.१.१५ इति ङीप्]

५. निर्लोभा लोभनाशिनी ।

निर्लोभा (निर्गता लोभात्) – निर्लोभ+टाप् ['अजाद्यतष्टाप्'- ४.१.४]

लोभनाशिनी (लोभानां नाशिनी) – नाशिन्+ङीप् ['ऋन्नेभ्यो ङीप्'-४.१.५]

६. सृष्टिकर्त्री भगवती ।

सृष्टिकर्त्री(सृष्टेः कर्त्री) – कर्तृ+ङीप् ['ऋन्नेभ्यो ङीप्'-४.१.५]

भगवती (भगः अस्य अस्तीति 'तदस्यास्त्यस्मिन्निति मतुप्' – ५.२.९४) – भगवत्+ङीप् ['उगितश्च'- ४.१.६]

७. दशरथस्य पत्नीषु कनिष्ठा केकयी ।

पत्नी – 'पत्युर्नो यज्ञसंयोगे' (४.१.३३) इति पतिशब्दस्य नकारः अन्तादेशः,पत्न्+ङीप् ['ऋन्नेभ्यो ङीप्'- ४.१.५]

कनिष्ठा – कनिष्ठ+टाप् ['अजाद्यतष्टाप्'- ४.१.४]

केकयी (केकयस्य स्त्री) – केकय+ङीष् ['पुंयोगादाख्यायाम्'- ४.१.४८]

८. शर्वर्यां भज महेश्वरीम् ।

शर्वरी (शॄ हिंसायां धातोः 'अन्येभ्योऽपि दृश्यन्ते'-३.२.७५ इति वनिप्-प्रत्ययान्तः) – शर्वन्+ङीप् ['वनो र च'- ४.१.७ इति ङीप्, रेफश्चान्तादेशः]

महेश्वरी(महती ईश्वरी,ईश्वरस्य स्त्री) – ईश्वर+ङीष् ['पुंयोगादाख्यायाम्'- ४.१.४८]

९. शङ्कराचार्यैः रचिता विष्णुषट्पदी ।

रचिता – रचित+टाप् ['अजाद्यतष्टाप्'- ४.१.४]

विष्णुषट्पदी (विष्णोः षट्पदी, षट् पादाः यस्याः इति समासे 'सङ्ख्यासुपूर्वस्य'-५ .४.१४० इति अकारलोपः) – षट्पाद्+ङीप् ['पादोऽन्यतरस्याम्' -४.१.८ इति ङीप् भत्वात् 'पादः पत्' ६.४.१३० इति पदादेशः]

१०. अस्य देशस्य सीमासु बह्व्यः नद्यः प्रवहन्ति ।

सीमा – सीमन्+डाप् [नान्तत्वात् 'ऋन्नेभ्यो ङीप्' ४.१.५ इति ङीपि प्राप्ते, 'मनः'-४.१.११ इति तन्निषेधे, 'डाबुभाभ्यामन्यतरस्याम्' – ४.१.१३ इति डाप्, डित्त्वात् 'टेः' – ६.४.१४३ इति टिलोपः]

बह्वी – बहु+ङीप् ['बह्वादिभ्यश्च'- ४.१.४५]

नदी – नद+ङीप् [पचादिगणे नदट् इति प्रातिपदिकं पठितम्, टित्त्वात् 'टिड्ढाणञ्..' -४.१.१५ इति ङीप्]

११. गौर्याः कात्यायनीति नामान्तरं वर्तते ।

गौरी – गौर+ङीष् ['षिद्गौरादिभ्यश्च' – ४.१.४१]

कात्यायनी – कात्य+ष्फ+ङीष् [कतस्य अपत्यं कात्यः – 'गर्गादिभ्यो यञ्' ४.१.१०५, 'सर्वत्र लोहितादिकतन्तेभ्यः' – ४.१.१८ इति नित्यं ष्फः, तस्य 'आयनेयीनीयियः...' ७.१.२ इति आयन्नादेशः, षित्त्वात् 'षिद्गौरादिभ्यश्च' – ४.१.४१ इति ङीष्]

१२. भूदेव्याः कुमारी वैदेही ।

भूदेवी (भूः देवी) – देव+ङीप् [पचादिगणे देवट् इति प्रातिपदिकं पठितम्, टित्त्वात् 'टिड्ढाणञ्..' -४.१.१५ इति ङीप्]

कुमारी – कुमार+ङीप् ['वयसि प्रथमे' – ४.१.२० इति ङीप्]

वैदेही (विदेहस्य अपत्यं स्त्रीत्यर्थे 'तस्यापत्यम्' ४.१.९२ इति अण्प्रत्ययान्तः)– वैदेह+ङीप् ['टिड्ढाणञ्...' – ४.१.१५ इति ङीप्] / वैदेह+ङीष् ['पुंयोगादाख्यायाम्' – ४.१.४८]

१३. पञ्चवट्याः समीपे गोदावरीनदी प्रवहति ।

पञ्चवटी (पञ्चानां वटानां समाहारः) – पञ्चवट+ङीप् ['द्विगोश्च' – ४.१.२१]

१४. मम बाला त्रिहायणी ।

बाला – बाल+टाप् ['वयसि प्रथमे' – ४.१.२० इति ङीपि प्राप्ते अजादिगणे पठितत्वात् 'अजाद्यतष्टाप्-४.१.४]

त्रिहायणी (त्रीणि हायनानि अस्याः) – त्रिहायन+ङीप् ['दामहायनान्ताच्च' – ४.१.२७ इति ङीपि 'त्रिचतुर्भ्यां हायनस्य णत्वं वाच्यम्' इति वार्त्तिकेन णत्वम्]

१५. सः एन्याः हय्याः, रोहिण्याः धेन्वाः च स्वामी ।

एनी – एत+ङीप् ['वर्णादनुदात्तात्तोपधात्तो नः' – ४.१.३९ इति ङीप्, तकारस्य नकारादेशश्च]

हयी – हय+ङीष् ['जातेरस्त्रीविषयाद्..' ४.१.६३ इति ङीषः योपधत्वाद् अप्राप्तौ गौरादिगणे पाठात् 'षिद्गौरादिभ्यश्च' ४.१.४१ इतिङीष् / योपधप्रतिषेधे हय-गवय-मुकय-मनुष्य-मत्स्यानामप्रतिषेधः(वा)]

रोहिणी – रोहित+ङीष् ['वर्णादनुदात्तात्तोपधात्तो नः' – ४.१.३९ इति ङीप्, तकारस्य नकारादेशश्च, णत्वम्]

धेनुः – स्त्रीप्रत्ययान्तो न ।

१६. भवान् नाग्याः बिभेति, उत नागायाः?

नागी - नाग+ङीष् [ स्थौल्ये गम्ये 'जानपदकुण्डगोण...' ४.१.४२ इति ङीष्]

नागा – नाग+टाप् [स्थौल्यार्थे अगम्यमाने 'जानपद...' इत्यस्य प्रवृत्त्यभावे 'अजाद्यतष्टाप्'-४.१.४]

१७. गौतमि! पट्वी त्वं पाककलायाम् ।

गौतमी (गोतमस्य अपत्यं स्त्री – 'तस्यापत्यम्' ४.१.९२ इत्यण्] – गौतम+ङीन् ['शार्ङ्गरवाद्यञोङीन्'-४.१.७३]

पट्वी – पटु+ङीष् ['वोतो गुणवचनात्'-४.१.४४ इति ङीष्]

कला – कल+टाप् ['अजाद्यतष्टाप्'-४.१.४]

१८. वन्देऽहं ब्रह्माणीं वृषाकपाय्यौ च ।

ब्रह्माणी (ब्रह्माणम् आनयति इत्यर्थे 'कर्मण्यण्'- ३.२.१ इति अण्प्रत्ययान्तः)- ब्रह्माण+ङीप् ['टिड्ढाणञ्..'- ४.१.१५]

वृषाकपायी (वृषाकपेः स्त्री)- वृषाकपि+ङीप् ['वृषाकप्यग्निकुसितकुसिदानामुदात्तः'- ४.१.३७ इति ङीप्, ऐकारश्च अन्तादेशः]

१९. गोप्यः व्याघ्रीं दृष्ट्वा भयेन अकम्पन्त ।

गोपी (गोपस्य स्त्री) - गोप+ङीष् ['पुंयोगादाख्यायाम्'- ४.१.४८]

व्याघ्री (व्याघ्रजातेः स्त्री) – व्याघ्र+ङीष् ['जातेरस्त्रीविषयादयोपधात्' – ४.१.६३]

२०. महाराज्ञी चौरीम् आनेतुम् अनुचरीः आदिष्टवती ।

महाराज्ञी (महती राज्ञी) – राजन्+ङीप् ['ऋन्नेभ्यो ङीप्'- ४.१.५]

चौरी (चुरा शीलमस्याः इत्यर्थे 'छत्रादिभ्यो णः' – ४.४.६२) – चौर+ङीप् ['ताच्छीलिके णेऽपि' इति वार्त्तिकेन ङीप्]

अनुचरी (अनु चरति । चरति इत्यर्थे अच्-प्रत्ययान्तः चरट् इति शब्दः टित्त्वसहितः पचादिगणे पठितः) – चर+ङीप् ['टिड्ढाणञ्...' – ४.१.१५]

अधोदत्तयोः रूपयोः किं साधु? सप्रमाणं साधयत ।

१. पुरातनी – पुरातना

'सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च' (४.३.२३) इति सूत्रेण पुरा इत्यव्ययात् ट्युप्रत्यये निष्पन्नः पुरातनशब्दः । टित्त्वात् 'टिड्ढाणञ्..' (४.१.१५) इति ङीपि पुरातनी इति रूपं साधु ।

२. सुन्दरी – सुन्दरा

गौरादिगणे पाठात् सुन्दरशब्दात् 'षिद्गौरादिभ्यश्च' (४.१.४१) इति ङीष् । सुन्दरी इति साधु ।

३. शङ्करी – शङ्करा

शं कल्याणं/सुखं करोति इत्यर्थे 'शमि धातोः संज्ञायाम्' (३.२.१४) इति अच्-प्रत्यये शङ्करशब्दात् 'अजाद्यतष्टाप्' (४.१.४) इति टापि शङ्करा इति साधु ।

शङ्करस्य स्त्री इत्यर्थे 'पुंयोगादाख्यायाम्' (४.१.४८) इति ङीषि शङ्करी इत्यपि साधु ।

४. सहोदरी – सहोदरा

सह उदरं यस्याः इति बहुव्रीहिसमासे स्वाङ्गवाचकस्य उदरशब्दस्य उपसर्जनत्वात् 'स्वाङ्गाच्चोपसर्जनाद्..' (४.१.५४) इति ङीषि प्राप्ते, उदरशब्दस्य बह्वच्कत्वात् 'न क्रोडादिबह्वचः' (४.१.५६) इति तन्निषेधे, 'नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाच्च' (४.१.५५) इति पुनः ङीष्-प्राप्तौ, 'सहनञ्विद्यमानपूर्वाच्च' (४.१.५७) इति निषेधः । अदन्तत्वात् टापि सहोदरा इति साधु ।

५. सहचरी – सहचरा

चरतीति चरः । पचादिगणे 'चरट्' इति टित्त्वयुक्तः पाठः । तस्मात् 'टिड्ढाणञ्..' (४.१.१५) इति ङीपि सहचरी इति साधु ।

६. दुहित्री – दुहिता

दुहितृशब्दस्य ऋकारान्तत्वात् 'ऋन्नेभ्यो ङीप्' (४.१.५) इति ङीपि प्राप्ते 'न षट्स्वस्रादिभ्यः' (४.१.१०) इति तन्निषेधः ।

७. सुकुमारी – सुकुमारा

शोभना कुमारी सुकुमारी । कुमारशब्दस्य प्रथमवयोवाचकत्वात्, अनुपसर्जनत्वाच्च 'वयसि प्रथमे' (४.१.२०) इति ङीपि सुकुमारी इति साधु ।

८. सुलोचनी – सुलोचना

शोभने लोचने यस्याः सा। लोचनशब्दस्य स्वाङ्गवाचकत्वात्, उपसर्जनत्वाच्च 'स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्' (४.१.५४) इति ङीषि प्राप्ते 'न क्रोडादिबह्वचः' (४.१.५६) इति तन्निषेधः। अतः अदन्तत्वात् टापि सुलोचना इति साधु।

९. महादेवी – महादेवा

महती देवी। देवशब्दस्य पचादिगणे देवट् इति टित्त्वसहितः पाठः। ततः 'टिड्ढाणञ्...'( ४.१.१५) इति ङीपि महादेवी इति साधु। महादेवस्य पत्नी इत्यर्थे तु 'पुंयोगादाख्यायाम्' (४.१.४८) इति ङीष् प्राप्नोति। तत्पक्षेऽपि महादेवी इत्येव।

१०. कृशोदरी – कृशोदरा

कृशम् उदरं यस्याः। उदरशब्दस्य स्वाङ्गवाचकत्वात् उपसर्जनत्वाच्च 'स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्' (४.१.५४) इति ङीषि प्राप्ते, बह्वच्कत्वात् 'न क्रोडादिबह्वचः' (४.१.५६) इति तन्निषेधे प्राप्ते 'नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाच्च' (४.१.५५) इति पुनःप्राप्तिः। ङीषः वैकल्पिकत्वात् कृशोदरी, कृशोदरा इति उभयं साधु।

११. तादृशी – तादृशा

'त्यदादिषु दृशोऽनालोचने कञ्च' (३.२.६०) इति कञ्-प्रत्ययान्तः तादृक्-शब्दः। 'टिड्ढाणञ्...कञ्करपः' (४.१.१५) इति ङीपि तादृशी इति साधु।

१२. समानी – समाना

'केवलमामकभागधेयपापापरसमानार्यकृतसुमङ्गलभेषजाच्च' (४.१.३०) इति सूत्रेण संज्ञायां छन्दसि च ङीपि समानी इति साधु। तदितरत्र समाना इति साधु।

१३. मनुषी – मानुषी

मनुष्यशब्दात् 'जातेरस्त्रीविषयाद्..' (४.१.६३) इति ङीषः योपधत्वात् अप्राप्ते गौरादिगणे पाठात् 'षिद्गौरादिभ्यश्च'(४.१.४१) इति ङीषि अल्लोपोत्तरं 'हलस्तद्धितस्य' इति यलोपे मनुषी इति साधु । मनुष्यस्येदम् इत्यर्थे अणि मानुषशब्दात् 'टिड्ढाणञ्...' (४.१.१५) इति ङीपि मानुषी इत्यपि साधु ।

१४. पापी – पापा

'केवलमामकभागधेयपापापरसमानार्यकृतसुमङ्गलभेषजाच्च' (४.१.३०) इति सूत्रेण संज्ञायां छन्दसि च ङीपि पापी इति साधु । तदितरत्र पापा इति साधु ।

१५. सिंही – सिंहा

सिंहशब्दस्य जातिवाचकत्वात् योपधभिन्नत्वाच्च 'जातेरस्त्रीविषयादयोपधात्' (४.१.६३) इति ङीषि सिंही इति साधु ।

एषु वाक्येषु दोषयुक्तं रूपं चित्वा सप्रमाणं शोधयत –

१. भद्रे! दीर्घसुमङ्गली भव ।

संज्ञायां छन्दसि चैव सुमङ्गलशब्दात् 'केवलमामक...' (४.१.३०) सूत्रेण ङीष् । अत्र तयोरभावात् दीर्घसुमङ्गला इति भवेत् ।

२. इयं मम उपाध्यायानी – षड् वर्षाणि यावत् मां पाठितवती ।

या स्वयम् अध्यापयति सा उपाध्यायी, उपाध्याया वा । 'या तु स्वयमेवाध्यापिका तत्र वा ङीष् वाच्यः'(वा) । 'इन्द्रवरुण...' (४.१.४९) सूत्रेण विहितः आनुगागमस्तु पुंयोगे एव।

३. पञ्चवट्यां शूर्पनखी इत्यभिधाना राक्षसी श्रीरामम् आसादितवती ।

'नखमुखात्संज्ञायाम्' (४.१.५८) इति सूत्रेण संज्ञायां 'स्वाङ्गाच्चोपसर्जनात्..' (४.१.५४) इति प्राप्तः ङीष् निषिध्यते। 'पूर्वपदात्संज्ञायामगः' (८.४.३)इति णत्वे शूर्पणखा इति भवेत् ।

४. कष्टं व्याकरणं शास्त्रम् इति मामकी मतिः ।

संज्ञायां छन्दसि चैव मामकशब्दात् 'केवलमामक...' (४.१.३०) सूत्रेण ङीप् । अत्र तयोरभावात् टापि 'मामकनरकयोरुपसंख्यानम्' इति वार्त्तिकेन कात्पूर्वस्य इत्वे मामिका इति भवेत् ।

५. संस्कृतिरस्माकं सनातना ।

'सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च' (४.३.२३) इति सूत्रेण पुरा इत्यव्ययात् ट्युप्रत्यये निष्पन्नः सनातनशब्दः । टित्त्वात् 'टिड्ढाणञ्..' (४.१.१५) इति ङीपि सनातनी इति भवेत् ।

६. अश्वी महिषी हरिणी व्याघ्री सिंहिणी मूषिकी बिडाली भल्लूकी ।

सर्वेषाम् एतेषांजातिवाचकत्वात् 'जातेरस्त्रीविषयाद्..' (४.१.६३) इति ङीषि प्राप्ते अश्व-मूषिकयोः अजादिगणे पाठात् टाप्। अश्वा-मूषिका इति भवेत् । सिंहशब्दः अकारान्तः, न तु नकारान्तः । तस्मात् जातिलक्षणङीषि सिंही इति भवेत् ।

७. नवपदीम् ऋचं पठ ।

'टाबृचि' (४.१.९) इति सूत्रेण ऋचि वाच्यायां पादन्ताट्टाबेव इति नियम्यते । तेन नवपदा इति भवेत् ।

८. राष्ट्रपतिः गृहपतिः वीरपतिः दलपतिः सेनापतिः (सर्वेऽमी शब्दाः स्त्रीलिङ्गे) ।

'विभाषा सपूर्वस्य'(४.१.३४) इति सपूर्वस्य पत्युः वा नुगागमे राष्ट्रपत्यादयः साधवः । वीरपतिशब्दस्तु सपत्न्यादिगणे पठितः । तस्मात् 'नित्यं सपत्न्यादिषु'(४.१.३५) इति नित्यं नुगागमे ङीपि वीरपत्नी इति भवेत् ।

९. मम नाम कद्रुः ।

कद्रुकमण्डल्वोः इति अनुवर्तमाने 'संज्ञायाम्'(४.१.७२) इति सूत्रेण ऊङ् विधीयते। तेन संज्ञायां कद्रूः ।

१०. सद्योजातेयं शिशुः करतलमात्रा वर्तते ।

करतलं प्रमाणम् अस्याः इत्यर्थे 'प्रमाणे द्वयसज्दघ्नञ्मात्रचः' (५.२.३७) इति मात्रच्प्रत्ययः ।

'टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्...' (४.१.१५) इति ङीपि करतलमात्री इति भवेत् ।

उत्तरयत

१. बाला – प्रथमवयोवाचकत्वात् 'वयसि प्रथमे' (४.१.२०) इत्यनेन ङीप् कुतो न?

अजादिगणे पाठात् ङीपं बाधित्वा टाप् ।

२. ब्राह्मणी – जातिवाचकत्वात् 'जातेरस्त्रीविषयादयोपधात्' (४.१.६३) इत्यनेन ङीष् कुतो न?

शार्ङ्गरवादिगणे पाठात् ङीन् ।

३. शूद्रस्य स्त्री शूद्री – 'शूद्रा चामहत्पूर्वा..' इति वार्त्तिकेन टाप् कुतो न?

वार्त्तिके 'जातिः' इत्युक्तत्वात् पुंयोगे तल्लक्षणः ङीषेव ।

४. चन्द्रानना – आननशब्दस्य स्वाङ्गवाचित्वेऽपि 'स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्' (४.१.५४) इत्यनेन ङीष् कुतो न?

आननशब्दस्य बह्वच्कत्वात् 'न क्रोडादिबह्वचः' इति ङीष्निषेधः ।

५. आचार्या – 'इन्द्रवरुण...मातुलाचार्याणामानुक्' (४.१.४९) इति सूत्रेण आनुक्-ङीषौ कुतो न?

पुंयोगे एव आनुक् । या स्वयं व्याख्यात्री तस्मात् टाबेव ।